# Svaminarayanaprakatahetuh

# स्वामिनारायणप्रकटहेतुः

## Document Information


Text title : Svaminarayanaprakatahetuh

File name : svAminArAyaNaprakaTahetuH.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, deities_misc, ShaTkam

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# स्वामिनारायणप्रकटहेतुः

(भुजङ्गप्रयातम्)
प्रभौ प्रेमवन्तः परैकान्तिका ये जना वैष्णवाः सन्ति तेषां सुखाय ।
तदिच्छाप्रपूर्णाय तल्लालनायाक्षरादागतस्तत्र हेतुः परोऽयम् ॥ १॥

अधर्म्यासुरक्लेशगौ भक्तिधर्मौ तयो रक्षणाय प्रवृत्त्यै पृथिव्याम् ।
स्वयं कोसलच्छुप्पयोधामधर्मालये जन्म जग्राह हेतुर्द्वितीयः ॥ २॥

सदा स्वाक्षरस्थावतारी प्रभुर्यः स सर्वोपरि ज्ञानमस्ति स्वकीयम् ।
निजोपासनायाः पृथिव्यां प्रवृत्त्यै तयोरागतो हेतुरुक्तस्तृतीयः ॥ ३॥

स्वकीयावतारास्तदीयाश्च भक्ता निजोपासनां ज्ञानमाबोध्य तेषाम् ।
तथैतान् स्वधामाधिनेतुं विचिन्त्यागतः श्रीहरिर्हेतुरुक्तश्चतुर्थः ॥ ४॥

चिरान्नष्ट एकान्तिको धर्म उर्व्यां स तत्स्थापनायासतां निग्रहाय ।
सदैकान्तिकानां सतां रक्षणायागतः श्रीहरिः पञ्चमो हेतुरुक्तः ॥ ५॥

स्वयं पूर्वजीवान्मुमुक्षून्निजोपासनाज्ञानमाबोध्य नेतुं स्वधाम ।
तथा स्वस्वभक्ताश्रयेणापि कर्तुं मुमुक्षून्नवानागतः षष्ठहेतुः ॥ ६॥

इति श्रीस्वामिनारायणभगवानस्य प्रकटहेतुः समाप्ता ।

*Svaminarayanaprakatahetuh*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*